दिनाङ्क : 24/04/2026 सायम् - 06:20

## मुख्यवार्ता:

- पश्चिमबङ्गाल-राज्ये द्वितीय-चरणस्य मतदानाय निर्वाचन-प्रचारः चरमोत्कर्षे वर्तते , वरिष्ठनेतारः तावत् मतदातृन् आक्रष्टुं निर्वाचन-प्रचारे निमग्नाः सन्ति ।
- सर्वोच्चन्यायालयेन विशेष-गहन-पुनरीक्षणे पश्चिमबङ्गाल-मतदातृ-सूचीतः नाम-निष्कासन-विरुद्धं याचिका-श्रवणं निराकृतम् ।
- भारतेन सार्क-मुद्रा-विनिमय-तन्त्रस्यान्तर्गतं मालदीव-देशाय त्रिसहस्रकोटि-रूप्यकाणि निष्कासनाय अनुमतिः प्रदत्ता।
- सर्वोच्चन्यायालयेन घोषितं यत् कोऽपि न्यायालयः कामपि महिलां, विशेषतः अल्पवयस्कां, तस्याः इच्छायाः विरुद्धं गर्भधारणार्थं बाधयितुं न शक्नोति ।
- भारतीय-ऋतु-विज्ञान-विभागेन राजस्थान-उत्तरप्रदेश-छत्तीसगढ़-मध्यप्रदेश-विदर्भ-क्षेत्रेषु ऊष्णतरङ्गस्य पूर्वानुमानं प्रख्यातम्।
- आईपीएल-क्रिकेट-स्पर्धायाम् अद्य रात्रौ बेङ्गळूरु-नगरे रॉयल चैलेंजर्स बेंगलुरुदलं गुजरात-टाइटंसदलेन सह स्पर्धिष्यति ।

## बङ्गाल-प्रचारः

पश्चिमबङ्गालराज्ये द्विचत्वारिंशदधिक-शतासनेभ्यः आगामि-एकोनत्रिंशत् दिनाङ्के आयोज्यमानस्य द्वितीय-अन्तिम-चरणस्य मतदानाय सम्प्रति प्रचार-कार्यं चरमोत्कर्षे वर्तते। भारतीय-जनता-पार्टीतिदलस्य वरिष्ठ नेता प्रधानमन्त्री नरेन्द्रमोदी अद्य पानीहाटी इत्यत्र दलीय-प्रत्याशिनां समर्थने एकां जनसभां सम्बोधितवान्। प्रधानमन्त्रिणा प्रतिपादितं यत् प्रथम-चरणस्य प्रचण्ड-मतदानेन राज्ये परिवर्तनस्य स्पष्टः सङ्केतः प्राप्यते। सः अवदत् यत् आगामि-मासस्य चतुर्थ-दिनाङ्के परिणामानन्तरं राज्यं भ्रष्टाचार-सिण्डिकेट्-राज-महिलापमान-अवैधप्रवेश-वृत्तिहीनताभ्यः मुक्तो भविष्यति।

अपरतः केन्द्रीयमन्त्री अमितशाहः कोलकाता-नगरस्य न्यू टाउन् इत्यत्र वार्ताहर-सम्मेलने प्रमाणितवान् यत् भाजपा-दलं प्रथम-चरणस्य द्विपञ्चाशदधिकैकशत-आसनेषु दशाधिकशतात् अधिकानि आसनानि जेष्यति।

तृणमूल-कॉङ्ग्रेस-नेतृ ममता बनर्जी भवानीपुर क्षेत्रे प्रचारं करोति,अपरत्र तृणमूल-कॉङ्ग्रेसदलस्य महासचिवः अभिषेक बनर्जी च हावड़ा-दक्षिण २४-परगना-मण्डलेषु पथप्रदर्शनं करिष्यति। कॉङ्ग्रेस-सांसदः राजीव-शुक्लः उच्च-मतदान-प्रतिशतस्य प्रशंसां कुर्वन् उक्तवान् यत् एषा सुखद-घटना अस्ति, परन्तु अस्य वास्तविकः प्रभावः परिणामानन्तरमेव स्पष्टः भविष्यति।

## सर्वोच्चन्यायालय

सर्वोच्चन्यायालयेन अद्य पश्चिमबंगाले विशेष-गहन-संशोधनस्य अनन्तरं मतदातृसूचीतः तेषां नाम्नां निष्कासनेन व्यथितानां जनानां रिट्-याचिकायाः श्रवणं निराकृतम्। परन्तु वर्तमान-विधानसभा-निर्वाचने ते निर्वाचन-अधिकारिणः सन्ति इति सूचितम्। भारतस्य मुख्यन्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठेन याचकेभ्यः याचिका-न्यायाधिकरणं प्रति गन्तुं निर्देशः कृतः। एतानि न्यायाधिकरणानि विशेष-गहन-संशोधनस्य परीक्षणप्रक्रियावधौ निर्वाचकसूच्यां नाम्नां विलोपनस्य विरुद्धं विहित-याचिकानां विचारार्थं निर्मितानि सन्ति।

## मालदीव-भारतम्

भारतेन सार्क-मुद्रा-विनिमय-तन्त्रस्य अन्तर्गतं मालदीव-देशाय त्रिंशत्-अर्बुद-रूप्यकाणां प्रथम-निर्गम-प्रक्रियायै अनुमतिः प्रदत्ता। माले-नगरस्थेन भारतीय-उच्चायोगेन सूचितं यत् एषा धनराशिः तस्य तन्त्रस्य भागः अस्ति, यस्मिन् गत अक्टोबर-मासे राष्ट्रपति-मोहम्मद-मुइज़्ज़ू इत्यस्य भारत-यात्रायाः समये भारतीय-रिजर्व-बैङ्क,मालदीव-सर्वकारयोः मध्ये सहमतिः जाता। उच्चायोगेन विज्ञापितं यत् इयं सुविधा मालदीव-देशस्य वित्तीय-स्थिरतां स्थापयितुं महतीं भूमिकां निर्वक्ष्यति।भारतं स्वकीयायाः प्रतिवेशी-प्रथमः नीतेः तथा च सागर इति दृष्टिकोणान्तर्गतं मालदीव-देशाय निरन्तरं सहयोगं प्रयच्छति। अनेन सिद्धं भवति यत् भारतं संकटापन्न-समये कश्चन विश्वसनीयः सहभागी भवितुमर्हति।

## महिला-गर्भं

सर्वोच्चन्यायालयः अद्य एकस्मिन् महत्त्वपूर्णे निर्णये प्रतिपादितवान् यत् कोऽपि न्यायालयः कामपि महिलां, विशेषतः अल्पवयस्कां, तस्याः इच्छायाः विरुद्धं गर्भ-धारणार्थं बाधयितुं न शक्नोति। न्यायमूर्ति-बी.वी. नागरत्ना तथा च न्यायमूर्ति-उज्ज्वल-भुईंया इत्यनयोः न्यायपीठेन अद्य एकस्याः पञ्चदशवर्षीयायाः बालिकायाः सप्तमासाधिकं गर्भं चिकित्सकीय-रीत्या निष्कासयितुं अनुमतिः प्रदत्ता। पीठेन स्पष्टीकृतं यत् महिलायाः प्रजनन-सम्बद्ध-स्वायत्तता सर्वोपरि वर्तते। न्यायालयस्य मते महिलायाः शारीरिकी मानसिकी च अखण्डता लोकतन्त्रस्य आधारभूता अस्ति। न्यायालयेन एतदपि प्रोक्तं यत् स्वस्य शरीरस्य विषये निर्णयाधिकारः विशेषतः प्रजननसम्बद्धेषु विषयेषु संविधानस्य एकविंशतितमस्य अनुच्छेदस्यान्तर्गतं व्यक्तिगत-स्वातन्त्र्यं गोपनीयता च अनिवार्यः अंशः अस्ति।

## सर्वकारः-वातेन्धनम्

केन्द्रसर्वकारेण स्पष्टीकृतं यत् पश्चिम-एशिया-क्षेत्रे उत्पन्नायाः स्थितेः सत्त्वादपि देशे एलपीजी इत्यस्य आपूर्तिः सुचारु-रूपेण प्रचलति । कुत्रापि वातेन्धनस्य न्यूनता नास्ति। नवदिल्ल्यां मन्त्रालय-स्तरीये उपवेशने पेट्रोलियम-प्राकृतिक-गैस-मन्त्रालयस्य सचिवः सुजाता शर्मा अवदत् यत् सर्वकारः देशे गार्हस्थिक-इन्धनस्य अबाध-प्रवाहं सुनिश्चिनोति । तया ग्राहकाः परामृष्टाः यत् ते ऑनलाइन-माध्यमेन सिलेण्डर-पञ्जीकरणं कुर्वन्तु तथा च विक्रेतृ-केन्द्रेषु अवरोधं मा कुर्वन्तु। सा अग्रे सूचितवती यत् वाणिज्यिक-एलपीजी-आपूर्तिः अपि सप्तति-प्रतिशतं यावत् पुनः स्थापिता अस्ति। देशे पेट्रोल-डीजल-इन्धनयोः अपि पर्याप्तः सङ्ग्रहः विद्यते।अनेनैव सह पत्तन-पोत-जलमार्ग-मन्त्रालयस्य निदेशकः मनदीप-सिंह-रन्धावा अवदत् यत् सर्वकारः भारतीय-नाविकानां कल्याणार्थं तथा च समुद्री-व्यापारस्य निरन्तरतायै सर्वैरपि हितधारकैः सह सम्पर्कं करोति। विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अपि उक्तवान् यत् मन्त्रालयः पश्चिम-एशिया-सङ्कटस्य घटनानां सूक्ष्म-निरीक्षणं कुर्वन् अस्ति।

## आप-दलपरित्यागः

आम-आदमी-पार्टीति दलाय अद्य महत्तरं आघातं प्रयच्छन् तस्य त्रयः राज्यसभा-सांसदाः राघव-चड्ढा, सन्दीप-पाठकः, अशोक-मित्तलः चेत्येते दल-परित्यागस्य घोषणां अकुर्वन्। अद्य नवदिल्ल्यां वार्ताहर-सम्मेलने राघव-चड्ढा इत्यसौ उद्घोषितवान् यत् सः अन्यैः कतिपयैः राज्यसभा-सांसदैः सह भारतीय-जनता-पार्टीति दले सम्मिलितो भविष्यति। अनेन राजनैतिक-परिवर्तनेन संसदः उच्च-सदने समीकरणानि परिवर्तयितुं शक्नुवन्ति।

## भारतीय-ऋतु-विभाग

भारतीय-ऋतुविज्ञान-विभागेन सोमवासरपर्यन्तं राजस्थाने, उत्तरप्रदेशे, छत्तीसगढे, मध्यप्रदेशे, विदर्भे च उष्णतरङ्गस्य सम्भावना व्यक्तीकृता। श्वः पर्यन्तं दिल्ली-चण्डीगढ-हरियाणा-पञ्जाब-बिहारेषु अपि एतादृशी स्थितिः एव स्थास्यति। विभागेन प्रोक्तं यत् अस्मिन् समये एव कोङ्कणप्रदेशे, पश्चिमबङ्गाले, ओडिशायां, तमिलनाडौ, तटीय-आन्ध्रप्रदेशे, तटीय-कर्नाटके तथा गुजरातस्य तटीयप्रदेशेषु उष्णार्द्रा च स्थितिः प्रवर्तिष्यते।

## आई.पी.एल्

आई.पी.एल् क्रिकेट-क्रीडायामद्य बेङ्गलूरु-नगरस्य एम्. चिन्नस्वामी-क्रीडाङ्गणे सायं सार्धसप्तवादने रायल् चालेञ्जर्स् बेङ्गलूरु-दलं गुजरात् टाइटन्स्-दलं सम्मुखीकरिष्यति। गतरात्रौ मुम्बई-नगरस्य वाङ्खेडे-क्रीडाङ्गणे चेन्नै सुपर् किङ्ग्स्-दलेन मुम्बई इण्डियन्स्-दलं त्र्यधिकशतं धावनाङ्कैः पराजितम्।

॥ इति वार्ता: ॥